# प्रयाणगीतम्

प्रचल्यतां प्रचल्यतां स्वमातृभूः सुरक्ष्यताम् ।
स्वराष्ट्रवीरसैनिकाः स्वराष्ट्रभूः सुरक्ष्यताम् ॥ 1 ॥

स्ववक्षसां पराक्रमैः प्रबुद्धयुद्धसङ्क्रमैः ।
वामदक्षवामदक्ष- पूर्वकं पदक्रमैः ॥ 2 ॥

पदं पदं सहैव नैव कर्हिचित् पृथग् भवेत् ।
प्रचण्डशत्रुमण्डलेऽपि साहसं न वः पतेत् ॥ 3 ॥

त्रिशङ्कटं सुसङ्कटं च नैव मानसं धमेत् ।
सुताराशिवीरतापि वःपुरः स्वयं नमेत् ॥ 4 ॥

न लोभतो न मोहतोऽपि मार्गभ्रष्टता भवेत् ।
समस्तविश्वमण्डले बले बलिष्ठता भवेत् ॥ 5 ॥

स्वमार्गमध्य उत्थितः स पर्वतो निपात्यताम् ।
सुगर्जतो रिपो रदावली क्षणे निशात्यताम् ॥ 6 ॥

सुगर्जितोर्जितेन वो रिपुः पराजितो भवेत् ।
स्वरक्षणं न लक्षयन् स्वयं व आश्रितो भवेत् ॥ 7 ॥

स्थले जले नभस्तले रिपुर्न कोऽपि मुच्यताम् ।
अरे, भुशुण्डिमण्डिता पुरोऽन्तकोऽपि भक्ष्यताम् ॥ 8 ॥

प्रदायतप्तलोहितानि मातृभूः सुरक्ष्यताम् ।
स्वमातृदुग्धगौरवं समुज्ज्वलं विधीयताम् ॥ 9 ॥

©BSTBPC NOT TO BE PUBLISHED